# INTRODUCTION

The most interesting stanza of the empirical calendar printed herewith (for the first time) is 15 of the final section, which reads without emendation:

> श्रीभोजे चतुरर्ण्णवां कलयति प्रौढे तदोष्णा भुवं
> वि(वे)ख्याते भुवि रत्न:(त्र:) संभवलघुर्वैरोचनेर्व्वालभः ।
> गोलग्रंथविदां वरो दशबलः संस्मृत्य सौधोदनिं
> बोधव्यामणुबुद्धिभिर्व्विहितवांस्तथ्यां तेथैः सारणं(णीम्) ॥ १५ ॥

The custom of Indian astronomical writers of working from the current year dates our author, for he bases his calculations on śaka 977 (1. 15, 4. 1, 6. 1) as the initial point. This began on March 1-2, 1055 A.D. according to L.D. Swamikannu Pillai's *Indian Ephemeris* (vol. iii, Madras 1922). Thereby, we obtain two interesting byproducts.

The first is that Bhoja still ruled from ocean to ocean in 1055. The locative absolute and the present tense leave little doubt. This identifies the king as Bhoja Paramāra of Dhārā, the great Bhoja who left so deep an impression upon classical Sanskrit literature in its last great phase. The Paramāra copper-plate grants are dated in *saṃvat* years which began in *kārttika,* not *caitra* like the śaka years. For, Bhoja speaks (*Indian Antiquary,* vi, 1877, pp. 54-55) of making a land-grant in *caitra* of sāṃvat 1078 after having conceived the idea in *māgha* of the same year. The first known grant of Bhoja's successor Jayasiṃha Paramāra is dated at Dhārā, as on *āṣāḍha vadi* 13, of saṃvat 1112, which is June 24-25, 1056 A.D.

The final years of Bhoja's reign are supposed to have been disturbed by an invasion led by the kings Karṇa Kalacuri and Bhīma Solaṅkī, who took Dhārā just after Bhoja's death.[1]

---

1. D. C. Ganguly, *History of the Paramāra Dynasty* (Dacca, 1933), chap. iv, pp. 88-122, especially 118. Also, H. C. Ray, *Dynastic History of Northern India* (Calcutta 1936), vol. ii. The records are unusually full at the period, but hard to date through the flights of poetic fancy. Merutuṅga's fables and the Kalacuri

The question is whether Bhoja was alive when Jayasiṃha made the grant, and secondly whether the sack of Dhārā could have taken place within the sixteen months to which our evidence restricts us. The latter is most unlikely, particularly as one of the invaders is supposed to have been the Solaṅkī king, a neighbour of our author Daśabala, as it were. There is nothing to lead anyone to believe that Jayasiṃha could make land-grants from Dhārā, saluting Bhoja along with other ancestors, in the same style, if Bhoja had been alive. The conjecture comes from some negligible poetic references, and from Udayāditya claiming to be Bhoja's successor in saṃvat 1137. But the reason for this is quite clear, namely, that the invasion and defeat occurred during the inglorious reign of Jayasiṃha. The traditional season for campaigning is just after the rains have stopped; the period between October 1055 and June 1056 hardly leaves time enough for the capture of the capital and Jayasiṃha's re-establishment on the throne. One would be justified in concluding that Bhoja had died just before June 1056, when hostilities were expected or had commenced, but that the major actions of the war were fought later.

The second conclusion derived from the *Cintāmaṇi Sāraṇikā* needs some emendation of the second line of the stanza. As taken in my final text, it indicates that the author was an inhabitant of Valabhī, the younger brother of Ratnasambhava (in both of which I have the support of the commentator), and had a patron or *guru* or progenitor named Vairocana. Both personal names are famous in the Māhāyāna Buddhist tradition, as is Daśabala; the title *mahākāruṇika-bodhisattva* and the reverent phrase *saṃsmṛtya śauddhodanim* leave no doubt as to the author being a Buddhist. On the other hand, his tag line (l. 62) *ākrīḍante tridaśaramaṇī-tuṅga-pīna-staneṣu* is hardly the ascetic Buddhism of Gotama, and the dedication to Śāradā reminds us of Harṣa's *Nāgānanda*, with its Buddhist theme surcharged with Gaurī worship. In any case, there survived Buddhist families near Bhāvanagar in the 11th century, probably because they had come to terms with Śaivism.

---

inscriptions leave no room to doubt the fact of the conquest, but it seems obvious that by Bhoja, the latter means Bhoja's successor, though the campaign may have been planned and even started when Bhoja was alive.

The work was first known through Theodor Aufrecht's catalogue of Bodleian Sanskrit MSS. (viii, Oxford, 1864) p. 327 *b*, No. 776. Aufrecht's meticulous report that the author was a Buddhist who wrote during the reign of Bhoja of Dhārā, with a date probably śaka 977, went unheeded in the absence of systematic Indian epigraphy, which was then just beginning. A second MS. of the work was found by P. K. Gode at the Rājāpūr Pāṭhaśālā; it was he who suggested the editing of the text. His photographs and the microfilm supplied by the Bodleian library form the basis of the text. The Rājāpūr codex is older, being dated *āṣāḍha śuddha* 2 of saṃvat 1558,[1] and by far the more intelligently transcribed, but lacunary, having lost its initial folio, and being in a badly wormeaten condition. The Oxford copy is dated *kārttika śuddha* 4, of saṃvat 1596,[2] and in good condition, though the scribe was a professional who didn't know what he was copying. Both undoubtedly derive from the same source, as they show the same omissions, identical mislections, and reduplications. It further seems to me that the Oxford codex is a direct copy of the Rājāpūr MS. for the scribe repeats some slips of the other, without noticing the minute cancellation marks above the wrong letters; also, in 5. 3, the final devowelizing stroke on the preceding *pṛthak* has been mistaken to be a *mātrā* on the line below, to give the word *aiṣa*, which is actually the appearance of the Rājāpūr copy at a hasty glance. Unless the Rājāpūr scribe managed to duplicate the common model letter for letter and line for line, the Oxford copyist must have been directly influenced by him.

Thus, these two copies supplement each other only to the extent of giving a single somewhat corrupt manuscript. The text has necessarily to be emended, which was done with the

---

1. Colophon—Rājāpūr Ms.:

श्री ॥ शुभं भवतु ॥ स्वस्ति श्री संवत् १५५८ वर्षे आषाढ शुदि २ गुरौ लिखितो[ऽ]यं ज्योतिष-दशबलसमा-मिति ॥ शिवमस्तु सर्वजगतः ॥ छ ॥ छ ॥ ॥ छ ॥ श्रीरस्तु ॥ श्री ॥ हरिहराय नमः ॥ श्री ॥ छ ॥ छ ॥ श्री ॥

[by a later hand]

इदं पुस्तकं भूगोळ्युपनामक-सदाशिवोपाध्यायात्मज-परमानंदस्य ॥

2. Oxford Ms.:

स्वस्ति श्री संवत् १५९६ वर्षे कार्त्तिग शुदि ४ चतुर्थी वारधे ॥ रा० वीरन्याथ० पोथी ॥

powerful aid of my friend Prof. Dr. V. V. Gokhale. The scribes were Gujarāti, as shown by the regular substitution of *sa* for *śa*, interchange of *kha* and *ṣa*, writing *kṣunna* for *kṣuṇṇa* and an occasional *anusvāra* before a following nasal, as *bāṃṇa*. These and other slips of the type have been silently emended. Extra letters to supply the gaps have been inserted in square brackets. Plenty of doubtful readings have been left as they were, either because I do not know the correct reading, or because the emendation is unnecessary. One real gap still remains after 2. 8, which we have not even attempted to supply.

From information supplied by Dr. V. Raghavan of the Madras University—an essential step in any modern Sanskrit text criticism, as his Catalogus Catalogorum has already become indispensable to all workers in the field—a commentary on the work was discovered. This is MS. No. 9518 of the Baroda Oriental Institute's collection. The commentator was one Mahādeva, son of Acyuta Lūṇiga. The colophon reports the work to have been composed in śaka 1180, which is amply confirmed by an example worked out for that year. The actual copy is dated saṃvat 1495, śaka 1360, by the hand of a Vaiṣṇava scribe Mahādeva. This scribe uses pṛṣṭhamātrās so unintelligently, in marked contrast to the original text, and makes his *ṇa* so close to the Mahārāṣṭrian, that he may be taken as from Mahārāṣṭra. But the commentator himself was a Gujarāt man. The name Lūṇiga would seem to prove this, for we know of a Lūṇigadeva, father of the Vāghelā hero Vīradhavala, whose name is also variously reported as Lūṇapasāū, Lūṇapasāja, Lavaṇaprasāda, and Lāvaṇyaprasāda; of course, place names like Lūṇāvāḍā still remain in Gujarāt. This shows that the whole of Daśabala's tradition was confined to Western India, as is natural. For, the Islamic conquests made it difficult to spread his methods in Bhoja's former empire, and the Mohammedans, in any case, could utilize the work of a great contemporary of Daśabala, namely, Al Birūnī, who had mastered both Greek and Indian methods, along with Arabic contributions thereto. In the south, the Siddhāntaśiromaṇi naturally took its place at the head of Indian works. Daśabala gives nothing of any theoretical importance, which is the reason why his calculation methods for finding the *tithi*, nakṣatra, additional month, etc., could not match the Sūryasiddhānta tradition.

This is one reason for not making much use of nor publishing the commentary, which I have nevertheless copied out in full. The text is very badly written, and the paper in poor condition, with the first folio again missing, the folios to seven written in a different hand from the rest, and many other folios so badly worn as to be often illegible. The final folios are even worn through completely in spots, which in any case proves that the copy and the system had been used heavily in calculations. Mahādeva supplies no new details about Daśabala, is ignorant about Buddhism, which he doesn't mention at all, and glc sses the text without quoting it in full, or even quoting it extensively. Though he refers often to Brahmagupta, Vairocana is taken as 'son of Virocana', to apply to Daśabala himself, without explaining the locative absolute.

It follows from the inflection of both components that the title of the present work is 'the sāraṇikā named Cintāmaṇi'. The phrase *yoginām apy agamye* may be derived from Bhartṛhari.

The Cintāmaṇi-sāraṇikā finds no mention in S. B. Dikshit's Marāṭhi history of Indian astronomy, but another work of Daśabala is mentioned there (*bhāratīya jyotiṣa śāstrācā itihāsa*, 2nd. ed., Poona 1931, ps. 239-40), namely, the *Karaṇa-kamala-mārtaṇḍa* (KKM). Dikshit noticed that the KKM follows the Brahmasiddhānta, with close points of contact with Bhoja's Rājamṛgāṅka-karaṇa, and praiseworthy tabulated methods of rapid computation. All of this might equally well have been said of the Cintāmaṇi. But Dīkṣita's conclusion that Daśabala was a king of the Valabhi dynasty seems to me unjustified, being based only upon KKM 10.10:

वलभान्वयसंजातो विरोचनसुतः सुधीः ।
इदं दशबलः श्रीमान् चक्रे करणमुत्तमम् ॥ १० ॥

The actual MS of the KKM (20 of 1870-71, at the Bhandarkar Oriental Research Institute, Poona) is a clear though comparatively late copy of a defective codex with pṛṣṭhamātrās. I feel justified in taking the real reading to have been Vairocana-sutaḥ. We must now agree with Mahādeva that Vairocana (not Virocana) was Daśabala's father. But Valabhānvaya need not mean king of Valabhi, or descendant of such a king; descent from any prominent citizen of Valabhi would suffice.

The KKM is dated śaka 980, all its calculations being based upon that year. There are no bright tag-verses such as

those found in the Cintāmaṇi, for any of the ten KKM colophons; nor any mention of Bhoja, nor of any other king, nor of Buddhism. Yet the identity with our Daśabala is not in doubt, for the stanza above is followed by our 6.16 with slight variations, and preceded by the identical 60-year cycle of saṃvatsara names in the same stanzas. Some of the KKM colophons say that it was 'part of Daśabala's *jyotiḥ-śāstra*', which would, if taken seriously, indicate a larger work, or at least a larger scheme of which nothing else is hitherto known. The soberer style could denote less discriminating patronage, following the death of Bhoja, just three years after the earlier work.

It is a great pleasure to express my gratitude for the valuable enendations suggested by Dr. V. Raghavan, and for his indispensable help with the proofs.

D. D. KOSAMBI.

# ॥ चिन्तामणि - सारणिका ॥

॥ महाकारुणिक - बोधिसत्त्व - दशबल - विरचिता ॥

॥ ॐ नमो श्रीगणेशाय नमः ॥

॥ ॐ नमः सूर्याय ॥

नमोऽस्तु ते पार्वति पङ्कजानने प्रियंवदे वन्द्यमुनीन्द्रवन्दिते ।
दयापरे सुन्दरि शङ्करप्रिये कुरु प्रसादं मम देवि शारदे ॥ १ ॥

पुराचार्यैरेतैर्न खलु विहिताः स्वल्पविधिना
निजग्रन्थे ह्यन्तः स्फुटतिथिभयोगप्रभृतयः ।
अतः पश्यन् विश्वं गणितगहनोद्विग्नमधुना
नमस्कृत्यार्केन्दू दिशति तदुपायं दशबलः ॥ २ ॥

एकक्षणात् कृतपरिस्फुटलक्षसङ्ख्य-
नक्षत्रयोगतिथिबन्धुरसंविधानाम् ।
पीयूषवृष्टिमिव हृष्ट(ष्टि)करीमजस्रं
मत्सारणीं श्रुतिपुटैः कृतिनः पिबन्तु ॥ ३ ॥

[ अथ तिथिप्रकरणम् ॥ १ ॥ ]

तिथिप्रभृतिविज्ञानात् सम्यक् यात्रादि सिद्ध्यति ।
अतस्तत्सारणीं ब्रूमश्चिन्तामणिमिमां स्फुटाम् ॥ ४ ॥

चत्वारिंशत्सहाष्टाभिस्तिथीनांशे चतुःशतैः (४४८) ।
चतुःपञ्चाशता युक्तं नक्षत्राणां शतत्रयम् (३५४) ॥ ५ ॥

चत्वारिंशद्विनैकेन चतुर्भिरधिका शतैः (४३९) ।
योगानां पद्धतिः सैषा स्वसङ्ख्यातुल्यकोष्ठकैः ॥ ६ ॥

वारनाडीविनाडीभिरधोऽधः सूचितक्रमैः ।
तिथिनक्षत्रयोगानां पिण्डाष्टाविंशतिस्त्रिधा ॥ ७ ॥

लक्ष्यते या धनर्णाक्षैः कोष्टकस्थैः पलादिभिः ।
पिण्डनाडीफलोत्पत्त्यै स्पष्टार्थं रविकासु च ॥ ८ ॥

शरा(ङ्गा)ग्निमिताः (३६५) कोष्टा रविकाणां पृथक् पृथक् ।
तिथेर्योगस्य च क्षेपाः स्वर्णनाड्यादि चिह्निताः ॥ ९ ॥

मीनान्तमध्यमोष्णांशोः प्रवृत्ताः प्रतिवासरम् ।
भुजाफलस्य यातस्य चरार्धस्य च कोष्टकाः ॥ १० ॥

तावन्तो निखिला स्वर्णघटिकादिभिरन्विताः ।
ज्येष्ठमध्यकनिष्ठादीन् परिवर्तान् प्रचक्ष्महे ॥ ११ ॥

ध्रुवयोर्धिष्ण्ययोगानां पिण्डाभावस्य सिद्धये ।
एतेषामेव संबन्धाः स्थिता वारध्रुवा निजाः ॥ १२ ॥

तिथिनक्षत्रयोगानां प्रतिबद्धाः पृथक् पृथक् ।
कदाचित् सर्वथा शून्यं जायते पिण्डकध्रुवः ॥ १३ ॥

कदाचिद्द्विकलेनाद्यो गम्येन च गतेन च ।
तिथ्यादिरित्थमामूलप्रवृत्ताः कोष्टकास्त्रिधा ॥ १४ ॥

शाकः स्वरहयाङ्को नः (९७७) क्षुण्णः पक्षः शरैः (५२) पृथक् ।
क्ष्माङ्कद्विपनृपाप्तो नः(१६८९१) सिद्धाढ्यः(२४) क्ष्मानखैर्हृतः (२०१) ॥ १५ ॥

दिनादिः स्यात् पृथक् साब्दः सैको वारध्रुवः स्मृतः ।
पद्मिनीबन्धुवारादिरजादौ मध्यमे रवौ ॥ १६ ॥

ततोऽब्दौघः शिवः (११) क्षुण्णः पृथक् द्विस्थोदिगा(१०)हतः ।
शैलामराक्ष(५३३७)लब्धाढ्यश्चक्षुर्मुनिभिरन्वितः (७२) ॥ १७ ॥

नभोऽत्यष्टयंश (१७०) संयुक्तस्तत्त्वयुक् (२५) त्रिंशता(३०)हृतः ।
यल्लब्धमधिमासा स्युः शेषं शुद्धिः प्रकीर्तिता ॥ १८ ॥

खं(०) रूपं(१) द्वौ(२) त्रय (३) श्चान्द्री शुद्धिर्यदि तु जायते ।
व्येकास्तदाधिमासा स्युः शुद्धिस्तु त्रिंशता(३०)धिका ॥ १९ ॥

शुद्धया यातुर्तुभिर्हीनश्चैत्रादितिथिसंचयः ।
अब्दमध्येऽधिमासश्चेत्तद्यातितिथिभिर्युतः ॥ २० ॥

शुद्धौ सत्यां स चेदल्पः प्रदेयः शुद्धितस्तदा ।
शेषं च पञ्चषट्त्रिभ्यः (३६५) पात्यं शिष्टमहर्गणः ॥ २१ ॥

चरार्धरविकायातभुजाफलकृते कृतः ।
वर्षौघः पूषभिः (१२) क्षुण्णः साधिमासः खवह्निभिः (३०)॥ २२ ॥

हृतश्चैत्रादितिथ्याढ्यस्तिथिसिद्धयै तिथिव्रजः ।
स्वचतुःषष्टि (६४) भागोनश्चैत्रादितिथिसंचयः ॥ २३ ॥

विभुक्तविकलेनैष समवेतोदितादिता ।
अब्दक्षुण्णाक्षषट्त्र्याढ्यः (३६५) शुद्धयूनोऽङ्काभ्रभूयुतः (१०९) ॥ २४ ॥

वर्तमानभयोगाभ्यां गुरुवाराद्यहर्गणः ।
तिथीनां संचयोऽधस्थः स्थाणुभिः परिताडितः ॥ २५ ॥

मार्गणाग्निरसोपेत (६३५) स्त्र्यभ्रशैलाप्त (७०३) वर्जितः ।
सिन्धुसिन्धुर (८४) संयुक्तः कथ्यते द्युगुणोऽथ वा ॥ २६ ॥

वारक्षेपोऽब्धयः पञ्चवसुवेदा(४, ५, ४८)स्तिथेः स्मृतः ।
पिण्डप्रभृतयः शून्यमृक्षाणि शरबाहवः (०, २७, २५) ॥ २७ ॥

स्तम्बेरमं चतुर्वेदै(४४८)स्तष्टव्यस्तिथिसंचयः ।
लब्धं तु तत्क्षणं नाम शिष्टं कोष्टकसम्मितिः ॥ २८ ॥

ऋणं वारोदयोऽभ्रं खमक्षरामाः कुसायकाः (० ऋ, ०, ३५, ५१)
पिण्डप्रभृतयः शून्यं शैला नव दशोधनम् (०, ७, ९ धन, २)॥२९॥

आभ्यां तक्षणनिघ्नाभ्यां प्रक्षेपौ हीनसंयुतौ ।
वारध्रुवोऽर्कवाराद्यः पूर्णाद्यः पिण्डकः ध्रुवः ॥ ३० ॥

ध्रुवपिण्डप्रमातुल्यतिथिभिः परिताडिताः ५ ।
वक्ष्यमाणाः क्रमादेते वाराद्या व्योमगोशराः ॥ ३१ ॥

त्रयः शून्यं सरिन्नाथाः (०, ५९, ३, ४०) पिण्डप्रभृतयः पुनः ।
भूरभ्रं व्योममुन्यर्थां (१, ०, ०, ५७) इति राशिद्वयं कृतम् ॥ ३२ ॥

वारपिण्डध्रुवाभ्यां तत्पिण्डाभावाय पातयेत् ।
शिष्टकोष्टमितौ योज्यास्तिथयः पिण्डसम्मिताः ॥ ३३ ॥

परिवर्तोऽत्र चेद्भावां(नां) विधिः प्राग्वद्भवेत्तदा ।
इति वारध्रवो यश्च पिण्डानां ध्रुवकश्च यः ॥ ३४ ॥

तिथिकोष्टमितिर्यावद्व्यवहर्तुममी कृताः ।
वारध्रुवोऽयमारभ्यः शिष्टकोष्टकसम्मिति : ॥ ३५ ॥

तिथिकोष्टैर्युतः शिष्टैर्भोगः स्यादस्फुटस्तिथेः ।
स्तम्बेरमकरै(२८)स्तष्टा शेषकोष्टकसम्मितिः ॥ ३६ ॥

स्वाष्टाविंशतिसबंद्धाः शिष्टं कोष्टाः प्रकल्पयेत् ।
पलैश्च रविकाक्षुस्तैः(ण्णैः) स्वाष्टाविंशतिकोष्टजैः ॥ ३७ ॥

धनर्णाक्षैर्युता न्यूना रविकाः स्युः परिस्फुटाः ।
आभिरेव धनर्णाक्षरविकाभिश्च संस्कृतः ॥ ३८ ॥

भुक्तपिण्डघटीक्षुण्णैः स्वाष्टाविंशतिकोष्टजैः ।
पलाद्यैः संस्कृतश्चैष तिथिभोगः स्वखण्डवत् ॥ ३९ ॥

भुक्तपिण्डघटी त्रिंशदधिका चेत्संस्क्षरेत् (संस्कृता ?) ।
भोग्याभिस्तत्र नाडीभिर्धनर्णाभ्यां विपर्ययः ॥ ४० ॥

चरार्धं पञ्चभिर्भक्तं कोष्टकस्थं पलादि यत् ।
इष्टाक्षप्रभया क्षुण्णं स्वदेशे तन्निगद्यते ॥ ४१ ॥

तेन स्वर्णवशात् सार्धमध्यसंबन्धिभिः पलैः ।
भुजाफलस्य जातस्य विनाडीभिश्च संस्कृताः ॥ ४२ ॥

इति नाड्यादिकस्पष्टस्तिथिभोगः खगोदयात् ।
सौम्येतरदिशोर्यान्तैर्निजषड्भागवर्जितैः ॥ ४३ ॥

योजनैरुज्जयिन्याश्च षट्खाक्षि(२०६)सहितोज्झिताः ।
खाब्धिभक्ताः (४०) फलं यत्तत्पलच्छायाङ्गुलादिगा(१४३)॥४४॥

तद्वर्गात् सूर्यवर्गाढ्या(१४४)न्मूलमक्षश्रुतिः स्मृता ।
षड्(६)क्षुण्णाद्विषुवत्कर्णात् स्वदेशान्तरयोजनैः ॥ ४५ ॥

अन्यस्तादभ्रदिग्भक्ता(१००)द्विनाड्यादिफलं विदुः ।
लंकावन्तीकुरुक्षेत्ररेखायाः पूर्वपश्चिमे ॥ ४६ ॥

देशान्तरतया स्वर्णं वशतः प्रत्यहं दिशो(:?) ।
द्विघ्नस्तिथिस्त्रिरेकः सन् करणान्यद्रि(धि ?)तिष्ठति ॥ ४७ ॥

बवंबालवमाचार्याः कौलवं तैतिलं गरम् ।
वणिजं विष्टिरेतानि करणानि प्रचक्षते ॥ ४८ ॥

आद्यं शकुनिसंज्ञं स्याद् द्वितीयं स्याच्चतुष्पदम् ।
नागाह्वयं तृतीयं स्यात् किंस्तुघ्नं स्याच्चतुर्थकम् ॥ ४९ ॥

स्थिराण्येतानि बहुले चतुर्थस्योत्तरार्धतः ।
अथ तिथ्यर्धभोगाय तिथिभ्यो भोगजन्मनाम् ॥ ५० ॥

गतगम्यान्तरार्धेन युक्तो नाखाग्नि(३०)नाडिकाः ।
गताद्गम्येऽधिके न्यूने भुक्तिः स्यात् करणेषु च ॥ ५१ ॥

प्रवृत्तिश्च निवृत्तिश्च तया तेष्वेव साध्यते ।
त्रिंशच्च(३०)राधनाडीभिर्द्वेघ्नीभिः संस्कृता दिनम् ॥ ५२ ॥

द्युमानः स्यात्तदूना तु षष्टिर्मानं निशां प्रति ।
स्वदेशनाडिकापूर्वं चरार्धं वाध्वनः फलम् ॥ ५३ ॥

तुल्ययोः स्वर्णयोरैक्यमनैक्यं स्यादतुल्ययोः ।
निर्दिष्टस्वर्णकालाभ्यां कृत्स्ना वारप्रवृत्तयः ॥ ५४ ॥

स्वदेशेऽर्कोदयस्याग्रात् पृष्ठाच्च परिकीर्तिताः ।
समं चार्कोदयेनैव क्षि(क्ष)पाचरपतेः पुशि (पुरि)॥ ५५ ॥

अवमं तत्स्पृशत्येको यत्र वारस्तिथित्रयम् ।
तिथिश्च यत्र वारांस्त्रींस्त्रिदिनस्पृक् तदुच्यते ॥ ५६ ॥

निजध्रुवकजाः पिण्डनाड्यो द्विस्थाः समाहताः ।
स्वाष्टाविंशतिखण्डानां पलाद्यैः स्वर्णशालिनाम् ॥ ५७ ॥

यतोऽथ खण्डविश्वे(श्ले)षदलेन व्योमषड् हृताः ।
लब्धेन हीनसंयुक्तं तदैक्यार्धं यथाक्रमम् ॥ ५८ ॥

भोग्यादभ्यधिकोनं तु तद्भोग्यं खं स्फुटं विदुः ।
अनेन स्पष्टखण्डेन रविकाः पिण्डनाडिकाः ॥ ५९ ॥

नीताः स्पष्टत्वमथवा योग्याः [स्युः] तिथिभयोगयोः ।
विदित्वेत्थं तिथेः स्पष्टां सारि(र)णीं निखिलो जनः ॥ ६० ॥

सूर्याचन्द्रमसोर्लोकान् दीर्घमासाद्य मोदय(ते) ।
कोष्टबद्धावुभौ यस्मात् सूर्याचन्द्रौ परिस्फुटौ ॥ ६१ ॥

एतां सम्यग्दशबलकृतां सारणीमर्थसारां
ज्ञानज्योतिःकुमुदकलिकां कर्णयोर्ये वहन्ति ।
ते भुक्ते(क्त्वे)न्दुद्युमणिवसती योगिनामप्यगम्ये
आक्रीडन्ते त्रिदशरमणीतुङ्गपीनस्तनेषु ॥ ६२ ॥

इति महाकारुणिक-बोधिसत्त्व-
दशबल-विरचितायाम् चिन्तामणौ सारणिकायां
तिथिप्रकरणं प्रथमं समाप्तम् ॥

[ अथ नक्षत्रप्रकरणम् ॥ २ ॥ ]

द्युगणः पृथगष्टिघ्नां (१६) काक्षविश्वाप्तवर्जितः (१३५९) ।
नक्षत्रौघः सासिद्धाब्यस्तष्टस्तुरगबाहुभिः (२७) ॥ १ ॥

अवशिष्टं भवेद्धिण्यम् (?) अश्विन्यादियथाक्रमम् ।
भानां वारादयो वेदाः कुम्भिनः सशरास्त्रयः (२,४,५८,३) ॥ २ ॥

पिण्डाद्या भानि गोबाणा नयने क्षेपकौः(के)स्थिरौः(रे)(२७,५९,२) ।
ज्यायान् भ-परिवर्तः स्याद्भूरामश्रुतिपावकैः (३४३१) ॥ ३ ॥

वारादौ षड्भुजाक्षाणि स्वर्गिणः खसुधाकराः (६, ५२, ३३, १०) ।
पिण्डादयोऽभ्रमभ्रं च काष्ठाविशिष(ख)बाहवः (०,०,१०,२५) ॥४॥

मध्यमः परिवर्तोऽयं चतुःपञ्चत्रिभिः (३५४) स्मृतः ।
वारादयः शशी विश्वे लोचने वसुसिन्धवः (१,१३,२,४८) ॥ ५ ॥

पिण्डाद्या गगनं व्योमखगुणाः शैलपाणयः (०,०,३०,२७) ।
कनिष्ठः परिवर्तस्तु शिलीमुखचतुःकरैः (२४५) ॥ ६ ॥

वाराद्या द्वौ शराक्षाणि मुनयः करसायकाः (२,५५,७,५२) ।
पिण्डाद्या भानि बाणाक्षाण्यङ्गरामानभःकराः (२७) ॥ ७ ॥

परिवर्तो महाज्येष्ठच्छिद्रानलनवग्रहैः (९९३९) ।
वारादयोऽप्सराः सिद्धाः षट्त्रयो मुनिवह्नयः ॥ ८ ॥

पिण्डाद्या गगनव्योमव्योमद्विरदसागराः ।
नंध (२७,५५,३६,२०) द्चन्द्रा पञ्चेषवो रसाः ॥ ८ ॥ (?)

पिण्डप्रभृतयः खेन्दो(द्) भूजिनाः शरसागराः (०,१,२४,४५) ।
परिवर्तैः क्रमात् स्वैः स्वैस्तत्क्षेत्रक्षत्वसंचयम् ॥ ९ ॥

प्राप्तं तत्क्षणमुद्दिष्टं शिष्टं कोष्टकसम्मितिः ।
ये स्वीयपरिवर्तेषु वारपिण्डाः प्रकीर्तिताः ॥ १० ॥

स्वस्वतक्षणनिघ्नास्ते प्रक्षेप्याः क्षेपकस्थिरे ।
वाराद्यः पिण्डकाद्यश्च ध्रुवकः स्यात् पृथक् पृथक् ॥ ११ ॥

वारध्रुवेण योक्तव्याः कोष्टास्तच्छेषसम्मिताः ।
भवन्त्याकोष्टपर्यन्तामिमे भोगाः सुधान्वि(त्वि)षः ॥ १२ ॥

स्वपञ्चत्रिंशदंशाढ्यं (३५) शेषं कोष्टकसम्मितिः ।
तष्टानागाश्विभिः (२८) शेषं पिण्डाष्टाविंशतिः स्वकाः ॥ १३ ॥

तत्पलैस्त्रिहताः पिण्डनाडिकाः स्युर्विनाडिकाः ।
आभिश्च संस्कृता भोगाः स्वाष्टाविंशतिकोष्टवत् ॥ १४ ॥

पिण्डयातासु नाडीषु गम्यासु पुनरन्यथा ।
चरार्धस्य विनाडीभिर्देशान्तरपलैः सह ॥ १५ ॥

भुजाफलपलैर्जातपरपि[ण्डाश्च] संस्कृताः ।
परिशिष्टा भवन्त्येव महापुरिद्दढोदयात् (?) ॥ १६ ॥

नक्षत्रयोगपिण्डानां गतागम्याश्च नाडिकाः ।
चतसृणां विधातव्या मध्यदेया न या दिशाः ॥ १७ ॥

ज्येष्ठमध्यकनिष्ठादि पिण्डानां परिवर्तनैः ।
एतद्वशेन वाराणां मन्ये या परिवृत्तयः ॥ १८ ॥

इति नक्षत्रविज्ञानादिह प्राप्यौ(प्यो)र्जितश्रियम् ।
लोके हिममयूखस्य स्थितिं बध्नात्यनीश्वराम् ॥ १९ ॥

**इति महाकारुणिक-सत्त्वबोधि। दशबलविरचितायां चिन्तामणौ सारणिकायां नक्षत्रप्रकरणं द्वितीयं समाप्तम् ॥**

[॥ अथ योगप्रकरणम् ॥ ३ ॥]

द्युगणोऽधः शिवक्षुण्णः (११) सप्तशैलेन्दुभिर्हृतः (१७७) ।
लब्धेनोपरिमो (?) युक्तो जायते योगसंचयः ॥ १ ॥

सषोडश(१६)युतः शैललोचनै(२७)रवशेषितः ।
योगाविष्कम्भपूर्वाः स्युः स्थिरक्षेपोऽथ कथ्यते ॥ २ ॥

क्रमाद्वारादिको वेदा गिरिबाणाः शराब्धयः (४,५७,४५) ।
पिण्डाद्यस्तुरगाक्षाणि वसुबाणाः कृताब्धयः ॥ ३ ॥

परिवर्तो भवेद्योगैर्ज्येष्ठोऽष्टाङ्गयुगर्तुभिः (६४६८) ।
वाराद्याः षट् सुपर्वाणः स(शि)खिचन्द्रा हविर्भुजः (६, ३३,
१३, ३) ॥ ४ ॥

पिण्डाद्या भानि गोबाणा भूतवाताः खबाहवः (२७,५९,५५,२०) ।
मध्यमः परिवर्तस्तु रन्ध्रत्रिमकरालयैः (४३९) ॥ ५ ॥

वाराद्यास्तत्र खं कुम्भि चन्द्रास्ताना रसेषवः (०,१८,४९,५६) ।
पिण्डाद्या भानि नन्दार्था वेदवारिधयो रसा(ः) (२७, ५९,
४४, ६) ॥ ६ ॥

कनीयः परिवर्तोऽपि विलोचनदृगग्निभिः (३२२) ।
वारादिर्द्वे नवाम्भोधिगुणा मार्गणपावकाः (२,९,३४,३५) ॥ ७ ॥

पिण्डाद्यः पुष्करं त्रीणि शैलरामाः स्वरेषवः (०,३,३७,५७) ।
योगैर्ज्येष्ठतमः कुम्भिछिद्राग्निकृतसिन्धुभिः (४४३९८) ॥ ८ ॥

वारादयस्त्रयः शक्राश्चन्द्राक्षाणि स्वराग्नयः ।
पिण्डाद्या भानि गोबाणा नन्दाक्षाणीन्दुबाहवः (३, १४,
५१, ३७) ॥ ९ ॥

परिवर्तैः क्रमात् स्वैः स्वैस्तक्षे योगेषु संचयः ।
लब्धं तु तत्क्षणं नाम शिष्टं (२७, ५९, ५९, २१)
कोष्टकसम्मितिः ॥ १० ॥

संबन्धं परिवर्तानां वाराद्यः पिण्डकादि च ।
निजतत्क्षणसंक्षुण्णाः कुर्यादेकत्र संस्थितिम् ॥ ११ ॥

स्थिरक्षेपकसंयुक्तं ध्रुवकः स्यात् पृथक् पृथक् ।
वाराद्यः पिण्डकाद्यश्च शेषं कोष्टकसम्मितिः ॥ १२ ॥

प्रारभ्य वारध्रुवकः संयोज्यः प्रतिकोष्ठकम् ।
योगभोगाः स्युरेवैते किञ्चित् किञ्चिदसंस्फुटाः ॥ १३ ॥

स्वत्रिदस्त्रांशरहिता (२३) शेषकोष्टकसम्मितिः ।
तष्टा कुम्भकर्णैः (२८) शेषं स्वाष्टाविंशतिकोष्टकः ॥ १४ ॥

स्वाष्टाविंशतिखण्डेन तिथिवद्‌घटिका निजाः ।
परिस्पष्टा धनर्णाख्यैराभिर्भोगाश्च संस्कृताः ॥ १५ ॥

स्वकीयपिण्डनाडीभ्यः स्वाष्टाविंशतिकोष्टकैः ।
धिष्ण्ये यथा तथोत्पाद्य स्वर्णसंज्ञा विनाडिकाः ॥ १६ ॥

आभिश्च संस्कृताः कार्या भोगास्ते कोष्टकाः सदा ।
चरार्धस्य विनाडीभिर्देशान्तरपलैः सह ॥ १७ ॥

भुजाफलपलैर्जाता पलैरपि च संस्कृताः ।
परिस्पष्टा भवन्त्येते योगभोगाः खगोदयात् ॥ १८ ॥

तिथिनक्षत्रयोगानां भोगास्ते परमार्थतः ।
यत्सिद्धं चन्द्रसूर्याभ्यां तदाद्यन्ता भवन्त्यमी ॥ १९ ॥

चन्द्रसूर्यप्रसादेन दुष्प्राप्यं प्राप्यते नभि (नृभिः) ।
चन्द्रार्कप्राप्तजन्मासौ मया तु तिथिसारणी ॥ २० ॥

यदृच्छं योगानां गतिमधिगतार्थां प्रतिदिनं
विजानीते सम्यग्गणितसरणौ प्राप्तिपटिमा ।
स सूर्येन्द्वोर्लोकानधिवसति भूयश्च रमते
वरस्त्रीणां तुङ्गस्तनकलशयोर्मन्मथ इव ॥ २१ ॥

इति श्री-महाकारुणिक-बोधिसत्त्व-दशबल-विरचितायां
चिन्तामणौ सारणिकायां योगप्रकरणं
तृतीयं समाप्तम् ॥

[॥ अथ प्रकीर्णप्रकरणम् ॥ ४ ॥]

शाकोऽगनगनन्दोनः(९७७) सूर्यघ्नो (१२) माससंयुतः ।
द्विस्थो द्विघ्न(४)स्त्रिधाश्वाग्निद्वाब्ध्यो(२३७)ग्घ्रभेषु (५०७) भाजितः ॥ १ ॥

युक्तस्तल्लब्धचन्द्राभ्यां (१) द्व्यक्षक्ष्मा (१५२) न्नशवेन्दुयुक् (१११)
भूविश्वा(१३१)विहृतः प्राप्तोऽधिमाससहितो गणः ॥ २ ॥

अधिमासस्य यच्छेषस्वाभ्राकाक्षिलवोनितम् (५१२०) ।
तन्मुक्तोऽभीष्टमासघ्नबाणविश्वघटीगणः (१३५) ॥ ३ ॥

षष्ट्याप्तो भध्रुवो भादि स्याद्दर्शान्तेऽर्कचन्द्रयोः ।
नक्षत्रध्रुवकः क्षुण्णो द्वाभ्यां (२) योगध्रुवः स्मृतः ॥ ४ ॥

स पूर्वोक्तगणः क्षुण्णः सप्तार्चिर्जलराशिभिः (४३) ।
द्विस्थोऽगाहीभचन्द्राब्धीष्वाप्तो (५४१८६८६) नो रसविश्वयुक् ।
(१३६) ॥ ५ ॥

तत्षट्खेन्द्रलवो (१४०६) ब्ध्याब्ध्यो(४)गुण(३)क्षुण्णगणार्धयुक् ।
वारध्रुवो(व)श्च तष्टः स्यात् (७) लङ्कायां तपनोदयात् ॥ ६ ॥

माससंघोऽभ्ररुद्रघ्नः (११०)शरगोद्रिरसान्वितः (६२९५) ।
श्रुतीभगिरिविश्वाप्त(१३७८४)स्तिथ्यन्ते पिण्डकध्रुवः ॥ ७ ॥

द्विघ्न(२)मासगणेनाद्योऽष्टाक्षि (२८) तष्टो भवेदसौ ।
तिथेर्वारादिको भोगः शून्यं नन्देषवो गुणाः ॥ ८ ॥

पूर्णनिर्झरिणीनाथाश्चक्षुस्तु दिनरोचिषः (०,५९,३,४०,२,१२) ।
अस्य पिण्डादिको भोगः शीतांशुर्गगनं नभः ॥ ९ ॥

वसुधाधरभूतानि पृथिवीधरबाहवः (१,०,०,५७,२७) ।
भानोर्भप्रभृतिर्भोगो वियद्वेदाधरादृशः ॥ १० ॥

अङ्गभूतानि षड्बाणास्तिथिं प्रति निदर्शिताः ।
इष्टार्कः स्वदशांशोनेष्टतिथ्याद्यः क्षपापतिः ॥ ११ ॥

प्रतिमासं भवेद्भोगः (०,४,२१,५६,५६) सदा वारादिकस्तिथेः ।
चन्द्रमाः पृथिवी रामा आकाशश्वसना रसाः(१,३१,५०,६) ॥१२॥

पिण्डादि नयने व्योम गजाक्षीण्याब्धिसिन्धवः(२,०,२८,४४) ।
ध्रुवे भानां यमौ काष्ठा वस्वक्षाणि फणिद्विकाः(२,१०,५८,२८)॥१३

वारादिरेकधिष्ण्यस्य हिमदीधितिरम्बरम् ।
द्विवेदा गुणभूतानि मूर्च्छनाः समुदाहृताः (१, ०, ४२, ५३, २१) ॥ १४ ॥

पिण्डादिरेकधिष्ण्यस्य शशिक्ष्माविधुसिन्धवः ।
रसश्रोताश्विनी(स्रोतस्विनी)नाथास्तुहिनांशुशिलीमुखाः (१, १, ४२, ४६; ५१) ॥ १५ ॥

योगस्यैकस्य वारादिर्गगनं रसमार्गणाः ।
गगनेचरचक्षूंषि मूर्छना गुणसिन्धवः (०,५६,२९,२१,४३)

पिण्डादिरेकयोगस्य पूर्णं हयशिलीमुखाः ।
सिद्धा रन्ध्राणि गोचन्द्रा इति भोगाः स्वकाः स्वकाः (०,५७, २४,९,१९) ॥ १७ ॥

भध्रुवस्वेष्टमासान्ते विकलं पृथगन्वितम् ।
स्वाब्धीभभाग(८४)बाणाग्निभागाभ्यां (३५) तद्विशोधयेत् ॥१८॥

वारपिण्डकनाडीभ्यो धिष्ण्यान्ते ध्रुवको भवेत् ।
योगध्रुवस्य विकलं निजाद्रीन्दु(१७)लवोनितम् ॥ १९ ॥

स्वाग्निव्यंशोनं(२३)मन्यत्र वारपिण्डघटीगणात् ।
शोधयेदवशिष्टं तु योगान्ते ध्रुवको भवेत् ॥ २० ॥

पिण्डाभावकला प्रोक्ता उत्कृष्टः पिण्डकध्रुवः ।
चतुस्त्रिद्व्येकनाडीषु गम्यासु च गतासु च ॥ २१ ॥

ध्रवको धिष्ण्ययोगानां पिण्डाभावात्मकः स्मृतः ।
भूयिष्ठविकलेनापि पिण्डाभावात्मकस्तिथेः ॥ २२ ॥

सिन्धुरद्विमितैर्धिष्ण्ये नाड्यस्तु तुरगाब्धयः (४७,३०) ।
पिण्डानां सदलोपेतास्ता एव धनसंज्ञिकाः ॥ २३ ॥

धनं'वारेषु खं पूर्णपक्षाः खं श्रुतिसायकाः (०,२०,०,५४,४) ।
भसङ्ख्यैर्भैरिनपलैर्युक्ता नाड्योऽब्धिभूमयः(२७,१४,१२,ऋ)॥२४

ऋणं पिण्डेषु वारेषु रसा गगनगेन्दवः ।
स्तम्बेरमभुवः शून्यं क्षेपमाचक्षते धनम् (६,१९,१८,०, ध)॥२५॥

स्वं नाड्यः स्वाग्निभिर्योगैद्वर्यब्धयोऽक्षपलान्विताः(३०,४२,५,ध)।
पिण्डेऽब्देतास्तु तारेषु स्वमभ्रं वेदभूमयः ॥ २६ ॥

आकाशतटिनीनाथाः प्रालेयांशुप्रभञ्जनाः (०,१४,५६, धर४२?) ।
गोद्वियोगैः स्मृतिपलैर्युक्ता नाड्यः शरेन्दवः(२९,१५,१८,ऋ) ॥२७

ऋणाख्याः पिण्डकेष्वेता वारक्षेपोऽथ कथ्यते ।
कृ(ऋ)तवोऽष्टेन्दवो रुद्रा अन्तरिक्षाग्नयो धनम् (६, १८, ११, ३०) ॥ २८ ॥

बुध्वा सर्वध्रुवान् स्वांस्तैर्दर्शसंबन्धिनः पुरा ।
तिथिनक्षत्रयोगैश्च पिण्डतुल्यैः समाहृतैः ॥ २९ ॥

स्वस्वभोगैरिमान् स्वान् स्वान् भ्रंशयेदथ वर्धयेत् ।
पिण्डाभावो ध्रुवो येन तिथ्यादीनां प्रतीयते ॥ ३० ॥

दृष्टपिण्डघटीनां च परिवर्तानुसारतः ।
स्वबुद्ध्या कृशतां कुर्यात् क्षेपैरुक्तैर्भयोगयोः ॥ ३१ ॥

आदितः कोष्टकान् स्वे स्वे तादृग्वारध्रुवान्विताः ।
तिथ्यादीनामिमे भोगा भवेयुरुपरिस्फुटाः ॥ ३२ ॥

पूर्ववद्रविकायातश्चरार्धाद्युक्तकर्मणा ।
संस्कृताः स्पष्टतां यान्ति तरणेरुदयात् परः ॥ ३३ ॥

यदा पुनर्विलोमेति(न) तिथ्यादीन् कर्तुमिच्छति ।
निजवारध्रुवेभ्यस्तान् कोष्टकान् शोध[ये]त्तदा ॥ ३४ ॥

क्रमेण च तथा कुर्यात्स्वपिण्ड(स्य) घटीफलम् ।
उत्क्रमेण यथाकोष्टं चरार्धं रविकादि च ॥ ३५ ॥

इति निगदितशेषं सारणीं सारमेत-
च्छ्रवणपथमुपेतं शश्वदालोचयन्तः ।
इह हि विविधभोगात्(न्) प्राणिनः प्राप्य सम्यक्
त्रिदिवमथ वसन्तश्चन्द्रलोकं लभन्ते ॥ ३६ ॥

इति महाकारुणिक-बोधिसत्त्व-दशबल-विरचितायां
चिन्तामणौ सारणिकायां प्रकीर्णप्रकरणं
चतुर्थं समाप्तम् ॥ ४ ॥

[॥ अथ संक्रान्त्यानयनम् ॥ ५ ॥]

कृत्स्नस्तिथिध्रुवः प्रोक्तः सार्धं भोगैरनेकधा ।
भूयःसंक्रान्तयोऽर्कस्य प्रतीयन्तां पृथक् पृथक् ॥ १ ॥

शाकः स्वरहयाङ्कोनः क्षुण्णः पक्षशरैः (५२) पृथक् ।
क्ष्माङ्कद्विपनृपाप्तोनभूनखै(२०१)र्भाजितः फलम् ॥ २ ॥

यत्साब्दसूर्यसंक्रान्तेर्वारादिस्तद्भवध्रुवः ।
एष द्वादशभिः क्षेपैः समायुक्तः पृथक् पृथक् ॥ ३ ॥

स्वष्टाः संक्रान्तयः पूष्णो जा(त)स्तस्मादिहोदयात् ।
सप्तविंशतिभिः क्षेपैर्भतुल्यैः प्रतिसंचिताः ॥ ४ ॥

(इति) संक्रान्त्यानयनं समाप्तम् (॥ ५ ॥)

[अथ संवत्सरानयनम् ॥ ६ ॥]

शाकः सप्तस्वराङ्कोन(९७७)स्त्रिस्थः स्मृतिशसंयुतः(?) ।
पञ्चाङ्गाढ्यः(६५)खगोभाग(९०)खकृशानुभि(३०)रन्वितः ॥ [१] ॥

तष्टषष्ट्या (६०) गुरोरब्दाः खगोशेषं चतुर्गुणम् ।
मध्यमार्कस्य च क्रान्ताः स्युः प्रयातान्यहानि च ॥ २ ॥

प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः ।
अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च ॥ ३ ॥

ईश्वरो बहुधान्यश्च प्रमादी विक्रमो वृषः ।
चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ॥ ४ ॥

सर्वजित् सर्वधारी च विरोधी विकृतः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥ ५ ॥

हेमलम्बी विलम्बश्च विकारी शार्वरी प्लवः ।
शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥ ६ ॥

प्लवङ्गः कीलकः सौम्यः साधारणो विरोधकृत् ।
परिधावी प्रमाथी च आनन्दो राक्षसोऽनलः ॥ ७ ॥

पिङ्गलः कालयुक्तश्च सिद्धार्थो रौद्रदुर्मती ।
दुन्दुभी रुधिरोद्गारी रक्ताक्षः क्रोधनः क्षयः ॥ ८ ॥

तिथिनक्षत्रयोगानां सारणीममृ–च (?) काम् ।
प्राप्येतामन्त्य(त्य)जं पश्चात्तापं को वा न मुञ्चतु ॥ ९ ॥

अहो स्वार्थस्य सिद्धार्थाः प्रारम्भाः सर्वदेहिनाम् ।
अस्माकं तु जनं प्राप्य प्रीतिपीयूषवृष्टये ॥ १० ॥

कृतेन ग्रन्थरत्नेन मम मण्डल(य)तो महीम् ।
विद्वद्विपणिषु ब्रूत कति सन्ति परीक्षकाः ॥ ११॥

यावत् क्षितौ क्षितिपतिः क्षितिरन्तरिक्षं
धत्तेऽन्तरिक्षममृतांशुमयं च लक्ष्म ।
तावत् प्रमोदजननी हृदि सज्जनाना-
मेषास्पदं दशबलस्य कृतिः करोतु ॥ १२ ॥

भाविभावकरः समग्रकरणो भूत्वा तिथीनां गणान्
बिभ्राणः प्रतिराहमर्थिषु बहूधा(द्धा)राश्च योगैर्मुदा ।
स्वर्णाद्यस्फुटकोष्टकप्रभृतिभिः प्रस्तारितोऽर्थैर्मया
पञ्चाङ्गस्तिथिरेष सारणि मया मूर्तः प्रसादोऽर्पितः ॥ १३ ॥

वहति गणितगर्वं गोलकज्ञः कदाचि-
द्यदि मदनपरोऽसौ मुक्तसौजन्यवर्त्मा ।
जगदुपकृतियोगाजि(ज्जि)त्वरेऽस्मत्प्रबन्धैः(न्धे)
प्रथम(य)तु निजविद्यागर्वितो दूषणानि ॥ १४ ॥

श्रीभोजे चतुरर्णवां कलयति प्रौढे तदोष्णा (प्रौढेन दोष्णा) भुवं
विख्यातो भुवि रत्नसंभवलघुर्वैरोचनिर्वालभः ।
गोलग्रन्थविदां वरो दशबलः संस्मृत्य शौद्धोदनिं
बोध(द्ध)व्यामणुबुद्धिभिर्विहितवांस्तथ्यां तिथेः सारणीम् ॥१५॥

धन्यैरार्यभटादिभिर्निजगुणैर्डिण्डीरपिण्डोज्ज्वलै-
राब्रह्मादि विसारिभिः प्रतिदिशं विस्तारिताः कीर्तयः ।
स्मृत्वा तच्चरणाम्बुजानि रचितोऽस्माभिः परः(र)प्रार्थितै-
र्ग्रन्थोऽयं तदुपार्जितैः स्वसु[र]कृतैः प्रीतिं भजन्तां प्रजाः॥१६॥

इति महाकारुणिक-बोधिसत्त्व-दशबल-विरचितायां चिन्तामणौ
सारणिकायां संक्रान्ति-संवत्सरानयनं
प्रकरणं समाप्तम् ॥ छ ॥

गताब्दैर्गुणितम् एतत् । १ । १५ । ३१ । १७ ॥ १७ ।
संक्रान्तिमहानक्षत्रकोष्टकेषु युक्तं स्पष्टाः संक्रान्तयो भवन्ति ॥